कृष्णदास संस्कृत सीरीज
१६६
***

श्रीसदानन्दयतिविरचित:

# वेदान्तसार:

## श्रीनृसिंहसरस्वतीविरचितया सुबोधिन्या श्रीरामतीर्थविरचितया विद्वन्मनोरञ्जन्या च सहित:

सम्पादक : टिप्पणीकारश्च
**कर्णेल जी. ए. जेकब**

**चौखम्बा कृष्णदास अकादमी, वाराणसी**

KRISHNADAS SANSKRIT SERIES
166
****

# VEDĀNTASĀRA

OF

## SADĀNANDA

Edited with the Commentaries of Nṛsimhasarasvatī
and Rāmatīrtha

Edited with Notes and Indices
By
Colonel G. A. Jacob

CHOWKHAMBA KRISHNADAS ACADEMY
VARANASI

# वेदान्तसारः

## सुबोधिनीसहितः ।

[1]अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥ १ ॥

---

कृष्णानन्दं गुरुं नत्वा परमानन्दमद्वयम् ।
वक्ष्ये वेदान्तसारस्य टीकां नाम्ना सुबोधिनीम् ॥

इह खलु कश्चिन्महापुरुषो नित्याध्ययनविध्यधीतसकलवेदराशीनां चिन्मात्राश्रयतद्रूपाद्वयानन्दविषयानाद्यनिर्वचनीयभावरूपाज्ञानविलसितानन्तभवानुष्ठितकाम्यनिषिद्धवर्जितनित्यनैमित्तिकप्रायश्चित्तोपासनाकर्मभिः सम्यक्प्रसन्नेश्वराणामिष्टिका[१]चूर्णादिसंघर्षितादर्शतलवदतिनिर्मलाशयानां नलिनीदलगतजलबिन्दुवद्धिरण्यगर्भादिस्तम्बपर्यन्तं जीवजातं स्वात्मवन्मृत्योरास्यान्तर्गतं क्षणभङ्गुरं तापत्रयाग्निसन्दह्यमानमनिशमात्मन्यनुपश्यतामतिविवेकिनामत एवैहिकस्रक्चन्दनादिविषयभोगेभ्य आमुष्मिकहैरण्यगर्भाद्यमृतभोगेभ्यश्च वान्ताशन इवातिनिर्विण्णमानसानां शमादिसाधनसम्पन्नानामापाततोऽधिगताखिलवेदार्थत्वाद्देहाद्यहङ्कारपर्यन्तं जडपदार्थं तद्विलक्षणस्वप्रकाशस्वरूपे प्रत्यगात्मनि ब्रह्मानन्दत्वे संशयापन्नानां तज्जिज्ञासूनामल्पश्रवणेन मूलाज्ञाननिवृत्तिपरमानन्दावाप्तिसिद्धये प्रकरणमारभमाणः समाप्तिप्रचयगमनादिफलकशिष्टाचारपरिप्राप्तेष्टदेवतानमस्कारलक्षणमङ्गलाचरणस्यावश्यकर्तव्यतां प्रदर्शयँल्लक्षणयानुबन्धचतुष्टयं निरूपयन् परमात्मानं नमस्कुरुतेऽखण्डमित्यादिना । अभीष्टस्य निःश्रेयसस्य सिद्धये प्राप्त्यर्थम् । आत्मानमाश्रये । एकत्वेन प्रतिपद्य इत्यर्थः । नन्वविषयस्यात्मनः कथं प्रतिपत्तिरित्याशङ्क्याह अखिलाधारमिति । अखिलस्य चराचरात्मकप्रपञ्चस्य विवर्ताधिष्ठानत्वेन कारणत्वाक्रान्तं ब्रह्मैव प्रतिपद्ये न तु शुद्धमित्यर्थः । नन्वेवं च सति प्रतिपत्तिविषयत्वेन दृश्यत्वापत्तिमाशङ्क्याह

---

1. See Notes on this verse.

---

१. For this simile see *Bhāmatī* 1. 1. 4 (p. 95 Bib. Ind.).

अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः ।
गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ॥ २ ॥

वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रा-

---

अवाङ्मनसगोचरमिति । "यतो[1] वाचो निवर्तन्त" इत्यादिश्रुतिभिरविषयत्वप्रतिपादनात् । प्रतिपत्तिविषयत्वं कारणत्वोपलक्षितब्रह्मविषयत्वेनौपचारिकमिति भावः । नन्वेवमपि कारणत्वे मृत्पिण्डवदनित्यत्वशङ्कामपहरन्नाह सदिति । नाशाभावोपलक्षितस्वरूपं "सदेव[2] सोम्य" इत्यादिश्रुतेः । ननु तथापि जडत्वापत्तिमाशङ्क्याह चिदिति । स्वप्रकाशचैतन्यस्वरूपमिति यावत् । ननु तथाप्यपुरुषार्थत्वात्किमित्याश्रयणीयमित्यत आह आनन्दमिति । परमानन्दस्वरूपमित्यर्थः । ननु "भक्षितेऽपि लशुने न शान्तो व्याधिः" इति न्यायेन[3] प्रपञ्चस्याधिष्ठानव्यतिरिक्ततया प्रतीयमानत्वात्कथमद्वैतसिद्धिरित्याशङ्कां तूष्णीकुर्वन्नाह अखण्डमिति । सजातीयविजातीयस्वगतभेदशून्यमित्यर्थः । अत्र सच्चिदानन्दमिति प्रयोजनमखण्डमिति विषयः शास्त्रविषययोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धस्तत्कामोऽधिकारीत्यनुबन्धचतुष्टयमर्थादुक्तं भवति ॥ १ ॥

किञ्च "यस्य[4] देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन" इत्यादिश्रुत्या गुरुनमस्कारस्यापि शास्त्राङ्गत्वप्रतिपादनात्तन्नमस्कारोऽपि पृथक्त्वेन कार्य इति तन्नतिपूर्वकमभिधेयग्रन्थं प्रतिजानीते अर्थतोऽपीति । अपिशब्देन न केवलं शब्दतो डित्थादिवत्संज्ञामात्रं व्यवस्थितमपित्वर्थतः शब्दतश्चेति । अद्वयानन्दान् गुरूनाराध्य वेदान्तसारं यथामति वक्ष्य इत्यन्वयः । अद्वयाश्च ते आनन्दाश्चाद्वयानन्दास्तानद्वयानन्दान् । तत्र हेतुमाह अतीतद्वैतभानत इति । अतीतं गतं द्वैतभानं यतस्तस्मादतीतद्वैतभानतः । निरस्तसमस्तभेदज्ञानत्वादित्यर्थः । तान् गुरूनाराध्य कायवाङ्मनोभिर्नमस्कारगोचरीकृत्य । वेदान्तसारं वेदान्तानामुपनिषद्वाक्यजातानां मध्ये यत्सारं सिद्धान्तरहस्यं यस्मिन् ज्ञाते पुनर्ज्ञातव्यं नावशिष्यते तं वेदान्तसारं यथामति बुद्धिमनतिक्रम्य वक्ष्ये प्रतिपादयिष्य इत्यर्थः ॥ २ ॥

इदानीं सर्वस्यापि वस्तुविचारोद्देशपूर्वकत्वात्प्रतिज्ञातं वेदान्तं नामतो निर्दिशति वेदान्तो नामेति । उपनिषद एव प्रमाणमुपनिषत्प्रमाणम् । उपनिषदो यत्र प्रमाणमिति वा । तदुपकारीणि वेदान्तवाक्यसङ्ग्राहकाणि

---

१. *Tait.* 2. 4. 1. २. *Chhā.* 6. 2. 1. ३. See *Maxims* i (2nd. edn.). ४. *S'vet.* vi. 23.